# A-I/1/1282/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. चरकसौत्रामण्याः ऋषिः कः?
2. "राष्ट्रदाः" इति पदस्य कोऽर्थः?
3. अमुष्मै इति चतुर्थ्यन्तं कस्य नाम ग्राह्यम्?
4. "व्रजक्षितः" इति कस्य विशेषणम्?
5. "रथविमोचनी" संज्ञकाः ऋचः काः?

**अथवा**

जुषाणः इति पदस्य कोऽभिप्रायः?

6. माध्यन्दिनसंहितायाम् अग्निचयनमन्त्राः कुत्र वर्ण्यन्ते?
7. प्रथमचितिमन्त्राणाम् ऋषिः कः?
8. "गन्धर्वः" इति पदस्य कोऽभिप्रायः?
9. "देवावीः" इति पदस्य कोऽर्थः?
10. केन मन्त्रेण अजमभिमन्त्रयते?

**अथवा**

शुक्लयजुर्वेदप्रातिशाख्ये कति अध्यायाः सन्ति?

11. अधीयानस्य भोजनं कथं भवेत्?
12. अथकारस्य प्रयोगः कुत्र क्रियते?
13. सम्यक्पाठसिद्धये कस्य ग्रन्थस्य निर्माणं जातम्?

**अथवा**

वायोः कति स्थानानि भवन्ति?

14. "कृष्णोमृगसंयोगे" इति सूत्रेण किं ज्ञायते?

**अथवा**

"आमन्त्रितं च" इति सूत्रस्य कोऽर्थः?

15. "प्रणवश्च" इति सूत्रस्य कोऽभिप्रायः?

**अथवा**

प्रातिशाख्यानां गणना कस्मिन् वेदाङ्गे भवति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "वृष्ण ऊर्मिरसि राष्ट्रदा राष्टं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि वृषसेनोसिराष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोसि राष्ट्रदा राष्ट्रममुष्मै देहि॥"
इति मन्त्रं भाष्यदिशा विवेचयत।

17. "वर्णदोषविवेकार्थम्" इति सूत्रं प्रातिशाख्यदिशा विवेचयत।

18. "अवेष्टा दन्छशूकाः प्राचीमारोह गायत्री त्वावतुरथन्तर ँ साम त्रिवृत्सोमो वसन्त ऋतुर्ब्रह्मद्रविणम्॥"
इति मन्त्रं महीधरदिशा स्पष्टयत।

**अथवा**

"ओकारश्च पदान्तेऽनवग्रहः।" इति सूत्रं विवेचयत।

19. "सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि॥"
–इति मन्त्रं भाष्यदिशा विवृणुत।

**अथवा**

"इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि॥" इति सूत्रं विवेचयत।

20. "स्वरितवर्जमेकोदात्तं पदम्॥" इति सूत्रं व्याख्यायत।

**अथवा**

"सोमस्य त्विषिरसि तवेव मे त्विषि भूयात्। मृत्योः पाह्योजोऽसि सहोस्यमृतमसि॥"
–इति मन्त्रं प्रातिशाख्यदिशा निरूक्तदिशा वा विवृणुत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. वाजसनेयिप्रातिशाख्यस्य वैशिष्ट्यं निरूपयत।

**अथवा**

वेदिकानिर्माणं यथाशास्त्रं वर्णयत।

# A-I/2/1283/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शाखाच्छेदनमन्त्रं लिखत।
2. पौर्णमास्यां प्रधानदेवताः काः भवन्ति?
3. अध्वरशब्दस्य कोऽर्थः?

**अथवा**

"वृत्रहन्" कस्य देवस्य नाम?

4. यजुर्वेदस्य कति शाखा उपलभ्यन्ते?
5. नास्तिकः कः?
6. महीधरभाष्यस्य नाम किम्?

**अथवा**

यजुर्वेदस्य श्रौत्रसूत्रं किम्?

7. दर्शपूर्णमासयागे कति प्रधानहवींषि भवन्ति?
8. महर्षिवेदव्यासस्य पितरौ कौ?

**अथवा**

काण्वशाखीयशतपथब्राह्मणे कति अध्यायाः सन्ति?

9. गार्हपत्याग्निः कस्यां दिशि भवति?
10. गोपथब्राह्मणं कस्य वेदस्य भवति?

**अथवा**

"ब्रीहि" इत्यनेन किं ज्ञायते?

11. "अहन्या" इति शब्दस्य कोऽर्थः?

12. विकृतिः का ?

13. शाकलशाखा केन वेदेन सम्बद्धा ?

**अथवा**

दश यज्ञायुधानां नामानि लिखत।

14. अग्निहोत्रहवण्याः उपयोगः कदा क्रियते ?

15. "अनर्वा" इति शब्दस्य कोऽर्थः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. शतपथब्राह्मणदिशा आज्यावेक्षणं प्रतिपादयत।

17. व्रतोपायनविधिं लिखत।

**अथवा**

"अग्नेव्रतपते व्रतम्. . . . . " इति मन्त्रं लिखत।

18. पात्रासादनं यथाशास्त्रानुसारं लिखत।

**अथवा**

हविः प्रोक्षणविधिं लिखत।

19. पत्नीसंनहनं प्रतिपादयत।

**अथवा**

इध्माबर्हिषोः प्रोक्षणं परिधानं च वर्णयत।

20. "कुक्कुटोऽसि मधुजिह्व" इति मन्त्रं यथाब्राह्मणं व्याख्यात।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. दर्शयागे उपयुज्यमानानां यज्ञपात्राणां परिचयं लिखत।

**अथवा**

दर्शपूर्णमाससम्बद्धान् दश मन्त्रान् लिखत।

# A-I/3/1284/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. जैमिनिमहर्षिप्रोक्तं यजुर्लक्षणं किम्?
2. सायणविरचितभाष्यस्य नाम किम्?
3. कात्यायनश्रौतसूत्रस्य प्रथमसूत्रं लिखत।
4. वैतानिकाग्नयः के भवन्ति?

**अथवा**

वेदं करोति इत्यत्र वेदशब्दस्य कोऽर्थः?

5. मन्त्रब्राह्मणयोर्वेदनामधेयम् इति कस्य वचनम्?
6. यास्कोक्तं मन्त्रनिर्वचनं लिखत।
7. यजुर्वेदस्य श्रौतसूत्रद्वयं लिखत।
8. यज्ञपात्राणि केन वृक्षेण निर्मातव्यानि?
9. प्रतिप्रस्थाता ऋत्विक्षु कस्मिन् गणे तिष्ठति?
10. काण्वशाखा कस्य वेदस्य भवति?
11. अम्यक् सा त इन्द्र ऋष्टिः इति मन्त्रः कस्मिन् वेदे वर्तते?

**अथवा**

चतुर्णां श्रौतयागानां नामानि लिखत।

12. मन्त्राणाम् उच्चारणात् अदृष्टार्था उत दृष्टार्थाः?

**अथवा**

परिसंख्यायां त्रयः दोषाः के भवन्ति?

13. गर्दभयागः कस्य प्रायश्चित्तत्वेन विहितम्?

**अथवा**

वषट्कारेण आहुतिदानं कुत्र भवति?

14. यागलक्षणप्रतिपादनसूत्रं लिखत।

**अथवा**

यत्रार्थवशेन पादव्यवस्था इति लक्षणं कस्य मन्त्रस्य भवति?

15. यास्कोक्तं यजुश्शब्दनिर्वचनं लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'फलयुक्तानि कर्माणि' इति सूत्रं व्याख्यात।

**अथवा**

'अविद्यमानवचनात्' इति जैमिनीयपूर्वपक्षसूत्रं सोदाहरणं सायणदिशा व्याख्यात।

17. सोमयागे षोडश-ऋत्विजां नामानि गणप्रदर्शनपूर्वकं लिखत।

18. 'सर्वेषामविशेषात्, मनुष्याणां वा आरम्भसामर्थ्यात्' इति सूत्रद्वयं विशदयत।

**अथवा**

'गुणार्थेन पुनः श्रुतिः' इति सूत्रं व्याख्यात।

19. परिसंख्यायां दोषत्रयं कथं प्राप्नुयुः इति विशदयत।

**अथवा**

'परं तु श्रुतिसामान्यमात्रम्' इति जैमिनीयसूत्रं सायणदिशा विवृणुत।

20. 'रथकारस्याधाने' इति सूत्रं प्रतिपादयत।

**स. एकः दीर्घोत्तरीयप्रश्नः समाधेयः।** **(1×20=20)**

21. अर्थवादप्रामाण्यं संक्षेपेण प्रतिपादयत।

**अथवा**

यजुर्वेदीयश्रौतसूत्राणां संक्षिप्तं परिचयं लिखत।

# A-I/4/1285/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. यज्ञसम्पादकाः पुरुषाः कतिधा विभज्याः?
2. कति हविर्यज्ञसंस्थाः?
3. दर्शपूर्णमासयोः कियन्तः ऋत्विजः भवन्ति?

**अथवा**

किं करोति ब्रह्मा?

4. उन्नेता ऋत्विक् कस्मिन् गणे भवति?
5. केन छन्दसा निवर्तयेत् राजन्यम्?
6. अर्थसंग्रहस्य प्रणेता कः?

**अथवा**

लिङ्गत्वं कुत्र भवति?

7. विकृतिः का?
8. अध्वर्युगणे के के ऋत्विजः भवन्ति?
9. वेदः कतिधा विभक्तः?

**अथवा**

विनियोगविधिः कः?

10. उद्गातृगणे के के ऋत्विजः भवन्ति?
11. अर्थसंग्रहः केन दर्शनेन सम्बद्धः?

**अथवा**

ब्रह्मगणे के के ऋत्विजः भवन्ति?

12. "अथातोधर्मजिज्ञासा" वाक्येस्मिन् अतः शब्दः कस्य वाचकः?

13. मीमांसादर्शनस्य अपरं नाम किम्?

**अथवा**

सामवेदस्य कति शाखाः आसन्?

14. दर्शपौर्णमासयागः प्रकृतिः उत विकृतिः?

15. पौर्णमास्ययागे कति यागाः भवन्ति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. षोडशानाम् ऋत्विजां नाम्ना परिचयो देयः।

17. "यस्य रुद्रः पशून् समयेत्" इत्यस्य व्याख्या यज्ञमधुसूदनानुसारेण लिखत।

**अथवा**

वेदप्रतिपाद्यः प्रयोजनवदर्थोधर्मः इति निरूपयत।

18. अवकीर्णप्रायश्चित्तविधानं लिखत।

19. अर्थसंग्रहस्य मङ्गलाचरणम् लिखत।

**अथवा**

शाब्दीभावनायाः स्वरूपं लिखत।

20. विशिष्टविधेः स्वरूपं यथाशास्त्रानुसारेण लिखत।

**अथवा**

प्रयोगविधेः स्वयरूपं निरूपयत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. वेदस्य अपौरुषेयतां वर्णयत।

**अथवा**

यज्ञमधुसूदनानुसारं यजमानस्य कर्तव्यानां विवेचनं कुरुत।